Totalbhakti.com

सूर्यस्तोत्रम्

श्रीगणेशाय नमः ॥

याज्ञवल्क्य उवाच ।

श्रृणुष्व मुनिशार्दूल सुर्यस्य कवचं शुभम् । शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥१॥

देदीप्यमानमुकुटं स्फुरन्मकरकुंडलम् । ध्यात्वा सहस्त्रकिरणं स्तोत्रमेतदुदीरयेत् ॥२॥

शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः । नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥३॥

घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः । जिह्वां मे मानदः पातु कण्ठं मे सुरवंदितः ॥४॥

स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः । पातु पादौ व्दादशात्मा सर्वांगं सकलेश्वरः ॥५॥

सूर्यसक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके । दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥६॥

सुस्नातो यो जपेत् सम्यग्योऽधीते स्वस्थमानसः । स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति ॥७॥

इति श्रीमद्याज्ञवल्क्यविरचितं सूर्यकवचस्तोत्रं सम्पूर्णम् ।

www.totalbhakti.com